**केन्द्रीयसंस्कृतविश्वविद्यालयः**

(संसदः अधिनियमेन संस्थापितः भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः)

गुरुवायूर् परिसरः, पुरनाट्टुकरा, तृश्शूर्, केरलम्-680551

शिक्षाशास्त्रविद्याशाखा 2025-2026

**शिक्षाशास्त्री सत्रारम्भकार्यक्रमः**

02.07.2025

**कार्यक्रमविवरणम्**

वर्षारम्भेऽस्मिन् शिक्षाशास्त्रकक्षायाः द्वितीयवर्षीयाणां सत्रारम्भः 02.07.2025 दिनाङ्के प्रारब्धः। अस्मिन् शैक्षिकसत्रे प्रविष्टानां छात्राणां कृते स्वागतीकर्तुं गुरुवायूर् परिसरस्य निदेशकवर्याणाम् आचार्याणां के.के.षैन् महोदयानां निर्देशानुगुणं 02.07.2025 तमे दिनाङ्के लघुकार्यक्रमः सञ्चालितः। कार्यक्रमसत्रस्यारम्भे शिक्षाशास्त्रि-द्वितीयवर्षीयः छात्राध्यापकः सत्यप्रकाशः शिष्टाचाररीत्या वैदिकमङ्गलाचरणमकरोत्। शिक्षाशास्त्रिद्वितीयवर्षीयः छात्रा उर्मी भोई लौकिकमङ्गलाचरणं कृतवती। शिक्षाशास्त्रविद्याशाखायाः अध्यापकः डा. श्रीधरराजन् महोदयः समागतानां सर्वेषां कृते स्ववचोभिः स्वागतं कृतवान्। साहित्यशास्त्रविद्याशाखायाः प्राध्यापकाः प्रो.के विश्वनाथन् महोदयाः विशिष्टभाषणेन छात्रान् प्रेरितवन्तः। कार्यक्रमेऽस्मिन् परिसरस्य वरिष्ठाध्यापकः प्रो.के.के.हर्षकुमार् महोदयाः मार्गदर्शकत्वेनासन्। अनुग्रहभाषणेन महोदयाः छात्रान् उद्बोधितवन्तः। शिक्षाशास्त्रविद्याशाखायाः अध्यापकाः डा. बि वि लक्ष्मीनारायणमहोदयः, श्रीमती ग्रीष्मा एम् एस् महोदया, डा. श्रीधरराजन् महोदयः च स्ववचोभिः नवागतान् छात्रान् उद्बोधितवन्तः। शिक्षाशास्त्रिद्वितीयवर्षीयाः छात्राध्यापकाः चन्दनतिलकधारणेन प्रथमवर्षीयान् छात्रान् स्वागतं कृतवन्तः। कार्यक्रमसत्रस्यान्तिमे शिक्षाशास्त्रविद्याशाखायाः प्राध्यापकः डा. डि. वेणुगोपालरावुमहोदयाः छात्रान् स्वभाषणेन प्रेरयित्वा धन्यवादसमर्पणं कृतवन्तः। सत्रसञ्चालनं शिक्षाशास्त्रविद्याशाखायाः अध्यापिका डा.श्रुती.के.बि कृतवती। सत्रस्यान्तिमे शान्तिमन्त्रोच्चारणेन कार्यक्रमः अयं सुसम्पन्नो अभवत्।

# सत्रारम्भकार्यक्रमः – स्मृतिचित्राणि















स्वागतानां
स्वागतम्











स्वागतानां
स्वागतम्




नवागतानां
स्वागतम्





IQAC/GC/2015-16/GB+D-45







